# Shri Bhagavaddhyanam

# શ્રીભગવદ્ધ્યાનમ્

## Document Information

Text title : shrIbhagavaddhyAnam

File name : bhagavaddhyAnam.itx

Category : vishhnu, vishnu, dhyAnam

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : January 6, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 6, 2024

*sanskritdocuments.org*

Shri Bhagavaddhyanam

# શ્રીભગવદ્ધ્યાનમ્

શ્રીગણેશાય નમઃ ॥

મઙ્ગલં ભગવાન્ વિષ્ણુર્મઙ્ગલં મધુસૂદનઃ ।
મઙ્ગલં પુણ્ડરીકાક્ષો મઙ્ગલં ગરુડધ્વજઃ ॥ ૧॥

સઞ્ચિન્તયેદ્ભગવતશ્ચરણારવિન્દં વજ્રાઙ્કુશધ્વજસરોરુહલાઞ્છનાઢ્યમ્ ।
ઉત્તુઙ્ગરક્તવિલસન્નખચક્રવાલજ્યોત્સ્નાભિરાહતમહદ્ધૃદયાન્ધકારમ્ ॥ ૧॥

યચ્છૌચનિઃસૃતસરિત્પ્રવરોદકેન
 તીર્થેન મૂર્ધ્ન્યભિધુતેન શિવઃ શિવોઽભૂત્ ।
ધ્યાતુર્મનઃશમલશૈલનિસૃષ્ટવજ્રં
 ધ્યાયેચ્ચિરં ભગવતશ્ચરણારવિન્દમ્ ॥ ૨॥

ઊરૂ સુપર્ણભુજયોરધિશોભમાના-
 વોજોનિધીસ્વતસિકાકુસુમાવભાસૌ ।
વ્યાલમ્બિપીતવરદાસસિવર્તમાન-
 કાઞ્ચીકલાપપરિરમ્ભિનિતમ્બમમ્બ ॥ ૩॥

નાભિહ્રદં ભુવનકોશગુહોદરસ્થં
 યત્રાત્મયોનિધિષણાખિલલોકપદ્મમ્ ।
વ્યૂઢં હરિન્મણિમુષસ્તનયોરમુષ્ય
 ધ્યાયેદ્દ્વયં વિતતહારમયૂખગૌરમ્ ॥ ૪॥

વક્ષોઽધિવાસમૃષભસ્ય મહાવિભૂતેઃ
 પુંસાં મનોનયનનિર્વૃતિમાદધાનમ્ ।
કણ્ઠં ચ કૌસ્તુભમણેરધિભૂષણાર્થં
 કુર્યાન્મનસ્યખિલલોકનમસ્કૃતસ્ય ॥ ૫॥

બાહૂંશ્ચ મન્દરગિરેઃ પરિવર્તનેન
 નિર્ણિક્તબાહુવલયાનધિલોકપાલાન્ ।

સઞ્ચિન્તયેદ્દશશતારમસહ્યતેજઃ
    શઙ્ખં ચ તત્કરસરોરુહરાજહંસમ્ ॥ ૬॥

કૌમોદકીં ભગવતો દયિતાં સ્મરેત
    દિગ્ધામરાતિભટશોણિતકર્દમેન ।
માલાં મધુવ્રતવરૂથગિરોપઘુષ્ટાં
    ચૈત્યસ્ય તત્ત્વમમલં મણિમસ્ય કણ્ઠે ॥ ૭॥

ભૃત્યાનુકમ્પિતધિયેહ ગૃહીતમૂર્તેઃ
    સઞ્ચિન્તયેદ્ભગવતો વદનારવિન્દમ્ ।
યદ્વિસ્ફુરન્મકરકુણ્ડલવલ્ગિતેન
    વિદ્યોતિતામલકપોલમુદારહાસમ્ ॥ ૮॥

યચ્છ્રીનિકેતમલિભિઃ પરિસેવ્યમાનં ભૂત્યા
    સ્વયા કુટિલકુન્તલવૃન્દજુષ્ટમ્ ।
મીનદ્વયશ્રિયમધિક્ષિપદબ્જનેત્રં
    ધ્યાયેન્મનોમયમતન્દ્રિત ઉલ્લસદ્ભ્રૂ ॥ ૯॥

તસ્યાવલોકમધિકં કૃપયાતિઘોર-
    તાપત્રયોપશમનાય નિસૃષ્ટમક્ષ્ણોઃ ।
સ્નિગ્ધસ્મિતાનુગુણિતં વિપુલપ્રસાદં
    ધ્યાયેચ્ચિરં વિતતભાવનયા ગુહાયામ્ ॥ ૧૦॥

હાસં હરેરવનતાખિલલોકતીવ્ર-
    શોકાશ્રુસાગરવિશોષણમત્યુદારમ્ ।
સમ્મોહનાય રચિતં નિજમાયયાસ્ય
    ભ્રૂમણ્ડલં મનુસુતે મકરધ્વજસ્ય ॥ ૧૧॥

ધ્યાનાયનં રહસિ તદ્બહુલાધરોષ્ઠ-
    ભાસારુણાયિતતનુદ્વિજકુન્દપઙ્ક્તિમ્ ।
ધ્યાયેત્સ્વદેહકુહરકે વસિતસ્ય વિષ્ણો-
    ર્ભક્ત્યાઽઽર્દ્રયાર્પિતમના ન પૃથગ્દિદૃક્ષેત્ ॥ ૧૨॥

ઇતિ શ્રીભગવદ્ધ્યાનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bhagavaddhyanam*

pdf was typeset on January 6, 2024

Please send corrections to *sanskrit@cheerful.com*